# Purushottamaproktam Sarvadevatamantra Stotram

# પુરુષોત્તમપ્રોક્તં સર્વદેવતામન્ત્રસ્તોત્રમ્

## Document Information

Text title : Purushottamaproktam Sarvadevatamantra Stotram

File name : puruShottamaproktaMsarvadevatAmantrastotram.itx

Category : devii, devI, lakShmInArAyaNIyasaMhitA, mantra, stotra

Location : doc_devii

Proofread by : PSA Easwaran

Description/comments : lakShmInArAyaNIyasaMhitA | khaNDa 3 | adhyAya 119/65-102||

Latest update : February 28, 2026

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 28, 2026

*sanskritdocuments.org*

# પુરુષોત્તમપ્રોક્તં સર્વદેવતામન્ત્રસ્તોત્રમ્

શ્રીનારાયણીશ્રીરુવાચ ।
કસ્ય મન્ત્રસ્ય તસ્યાસ્તુ જપો વિધિશ્ચ કીદૃશઃ ।
વદ મે ભગવન્નેતત્ સર્વલોકાભિકાઙ્ક્ષિતમ્ ॥ ૬૫॥

શ્રીપુરુષોત્તમ ઉવાચ ।
શ‍ૃણુ નારાયણીશ્રિ! ત્વં પદાર્થાઃ શબ્દબોધિતાઃ ।
નિત્યશબ્દાત્મકો વેદો મન્ત્રાસ્તત્રોત્તમા મતાઃ ॥ ૬૬॥

શ્રેષ્ઠાસ્તત્ર હરેર્મન્ત્રાઃ લક્ષ્મીમન્ત્રા સદોત્તમાઃ ।
દુર્ગાયાશ્ચ ગણેશસ્ય રવેઃ શમ્ભોર્વિભાવસોઃ ॥ ૬૭॥

મન્ત્રાણાં ચોત્તમા મન્ત્રાઃ મહાલક્ષ્મ્યા ભવન્તિ હિ ।
શ્યામાયાઃ કમ્ભરાયા વૈ વદામિ તે નિબોધ મામ્ ॥ ૬૮॥

પ્રાતરુત્થાય માં નત્વા સ્નાત્વા શુભાસનસ્થિતા ।
સ્મર સ્વમસ્તકે લક્ષ્મિ દિવ્યં કમલમુજ્જ્વલમ્ ॥ ૬૯॥

સહસ્રપત્રશોભાઢ્યં સકેસરસકર્ણિકમ્ ।
તત્ર શ્રીસદ્ગુરું ધ્યાત્વા પ્રસન્નં કરુણામયમ્ ॥ ૭૦॥

શ્રીમદ્ગોપાલકૃષ્ણાખ્યં પિતરં સદ્ગુરું પરમ્ ।
આચમ્ય ચોર્ધ્વપુણ્ડ્રં સચન્દ્રં કૃત્વા તતઃ પરમ્ ॥ ૭૧॥

સ્કન્ધે કૃત્વા પટ્ટકે ચ હૃદિ ધૃત્વા પરેશ્વરીમ્ ।
અન્તઃશુદ્ધિમતી ભૂત્વા સન્ધ્યાવન્દનમાચર ॥ ૭૨॥

અશ્વત્થપત્રાકારેણ પાત્રેણ સકુશાક્ષતમ્ ।
સપુષ્પચન્દનં ચાર્ઘ્યં મહાલક્ષ્મ્યૈ પ્રદેહિ તત્ ॥ ૭૩॥

ત્રિરર્ઘ્યં સમ્પ્રદાયાઽથ તર્પયિત્વા જલેન ચ ।
હોમભૂમિં પ્રગત્વૈવ સર્વશ‍ૃઙ્ગારશોભિતા ॥ ૭૪॥

સર્વપૂજાદિસામગ્રીસહિતા ચાસનસ્થિતા ।
અઙ્ગન્યાસાન્ કુરુ લક્ષ્મિ તાન્નિબોધ મયોદિતાન્ ॥ ૭૫॥

“ઓમનાદિપરબ્રહ્મૈશ્વર્યૈ શિરસિ મે નમઃ ।
ઓમનાદિકૃષ્ણનારાયણ્યૈ ભાલે ચ મે નમઃ ॥ ૭૬॥

ઓમનાદિવાસુદેવીલક્ષ્મ્યૈ મે નેત્રયોર્નમઃ ।
ઓમનાદિબ્રહ્મલક્ષ્મ્યૈ મુખે મે તે નમો નમઃ ॥ ૭૭॥

ઓમનાદિકમ્ભરાલક્ષ્મ્યૈ ચ કણ્ઠેઽસ્તુ મે નમઃ ।
ઓમનાદિમહાલક્ષ્મ્યૈ હૃદયે મે ચ તે નમઃ ॥ ૭૮॥

ઓમનાદિશ્રીનરાયણ્યૈ નમસ્તે મમોદરે ।
ઓમનાદિવૈષ્ણવ્યૈ તે નાભૌ મમ નમો નમઃ ॥ ૭૯॥

ઓમનાદિલલિતાયૈ જઘને તે ચ મે નમઃ ।
ઓમનાદિશ્રિયૈ ચાઽસ્તુ નમઃ સક્થ્નોશ્ચ મે સદા ॥ ૮૦॥

ઓમનાદિકમલાયૈ નમો જાન્વોશ્ચ મેઽસ્તુ તે ।
ઓમનાદિરમાયૈ તે નમોઽસ્તુ પાદયોર્મમ ॥ ૮૧॥

ઓમનાદિહરિણ્યૈ તે કરયોર્મે નમોઽસ્તુ તે ।
ઓમનાદિમહામાત્રે સર્વતસ્તે નમો નમઃ ॥ ૮૨॥

ઓમનાદિપદ્માયૈ દ્વિહસ્તતલયોસ્તે નમઃ ।
ઓમનાદિરક્ષિત્ર્યૈ તે પૃષ્ઠદેશે નમો નમઃ ॥ ૮૩॥

ઓમનાદિહિરણ્યાયૈ રમ્યાઙ્ગેષુ ચ તે નમઃ ।
ઓમનાદિસુવર્ણાયૈ ભાગ્યરેખાસુ તે નમઃ ॥ ૮૪॥

ઓમનાદિકુમાર્યૈ તે શીલધર્મે નમો નમઃ ।
ઓમનાદિજનન્યૈ તે સર્વાઙ્ગેષુ નમો નમઃ ॥ ૮૫॥

એવં ન્યાસાન્ વિનિર્વર્ત્ય ધ્યાયસ્વ શ્રીપુરાધિપામ્ ।
ધ્યાયસ્વ શ્રીપુરં ચાપિ શ્રીપુરેશીશ્વરં ચ મામ્ ॥ ૮૬॥

સુવર્ણનિર્મિતાં મૂર્તિમાવાહય તતઃ પરમ્ ।
આસનં સમ્પ્રદેહિ ત્વં પાદ્યમર્ઘ્યં તતઃ પરમ્ ॥ ૮૭॥

આચમનં જલં પઞ્ચામૃતસ્નાનં પ્રકારય ।
સુગન્ધિતૈલસારાદ્યૈઃ પ્રમર્દય પરેશ્વરીમ્ ॥ ૮૮॥

આભિષેકં કારયિત્વા વસ્ત્રભૂષાર્પણં કુરુ ।
સર્વં શ‍ૃઙ્ગારં સૌભાગ્યોત્તમં ધૂપં પ્રદીપકમ્ ॥ ૮૯॥

નમસ્કારં દણ્ડવચ્ચાઽરાર્ત્રિકં ચ પ્રદક્ષિણમ્ ।
નૈવેદ્યં વિવિધં ભોજ્યં ભક્ષ્યં ચોષ્યં ચ લેહ્યકમ્ ॥ ૯૦॥

જલં શાકાદિ વૈ પેયં દુગ્ધસારં ચ પાયસમ્ ।
જલપાનં નાગવલ્લીદલતામ્બૂલકં ફલમ્ ॥ ૯૧॥

પ્રદેહિ શ્રીમહાલક્ષ્મ્યૈ ક્ષમાપરાધનં વૃણુ ।
પુષ્પાઞ્જલિં પરિહારં કૃત્વા સ્વોદ્યમમાચર ॥ ૯૨॥

તતશ્ચ તુલસીમાલાં ધૃત્વા મન્ત્રં જપ પ્રિયે ।
મહાલક્ષ્મ્યા મહામન્ત્રં જપ લક્ષ્મિ મમ પ્રિયમ્ ॥ ૯૩॥

સર્વાર્થસાધકં સર્વાનર્થાનાં નાશકં પ્રભુમ્ ।
ઉદઙ્મુખા પ્રાઙ્મુખા વા જપ શ્રીસન્નિધૌ સદા ॥ ૯૪॥

“ૐ મહાલક્ષ્મ્યૈ વિદ્મહે મહાવિષ્ણુપત્ન્યૈ ધીમહિ ।
તન્નો મહાલક્ષ્મીઃ પ્રચોદયાત્ ।
ૐ શ્રીં મહાલક્ષ્મ્યૈ નમઃ ૐ હ્રીં ક્લીં શ્રીં ફટ્ સ્વાહા” ॥ ૯૫॥

ષટ્ત્રિંશલ્લક્ષસઙ્ખ્યાસ્તુ જપન્ સિદ્ધિર્ભવિષ્યતિ ।
તદ્દશાંશસ્તુ હોમઃ સ્યાત્ તદ્દશાંશં તુ તર્પણમ્ ॥ ૯૬॥

તદ્દશાંશં તુ ભક્તાનાં ભોજનં સમુપાચર ।
એવં મન્ત્રો ભવેત્ સિદ્ધઃ કામ્યજપાઁસ્તતઃ કુરુ ॥ ૯૭॥

લક્ષમાત્રં જપિત્વા તુ મનુષ્યાન્ વશમાનયેત્ ।
નારીર્દ્વિલક્ષજાપ્યેન ત્રિલક્ષૈસ્તુ નૃપાઁસ્તથા ॥ ૯૮॥

ચતુર્લક્ષૈર્નાગકન્યાઃ પાતાલસ્ત્રીસ્તુ પઞ્ચભિઃ ।
ષડ્લક્ષૈર્ભૂસુન્દરીશ્ચ સુરાણીઃ સપ્તલક્ષકૈઃ ॥ ૯૯॥

અષ્ટલક્ષૈર્દેવતાશ્ચ ગીર્વાણાન્નવલક્ષકૈઃ ।
દશલક્ષૈશ્ચ વૈ પિતૃન્નેકાદશૈઃ સુરેશ્વરાન્ ॥ ૧૦૦॥

દ્વાદશલક્ષજાપૈશ્ચ સિદ્ધીર્વશા નયેત્તથા ।
લક્ષ્મીવાન્ ધનવાન્ સ્યાચ્ચ સ્મૃદ્ધિમાન્ સ ભવેત્તથા ॥ ૧૦૧॥

યથેષ્ટં લભતે સર્વમૈશ્વર્યં દૈવતં તથા ।
ધ્યાયન્તસ્તાં જપન્તસ્તાં લભન્તે મહતીં શ્રિયમ્ ॥ ૧૦૨॥

સમ્પ્રાપ્યતે સિદ્ધિરેષા નાઽસદ્ભિસ્તુ કદાચન ।

ઇતિ શ્રીલક્ષ્મીનારાયણીયસંહિતાયાઃ દ્વાપરયુગસન્તાનાત્મકસ્ય તૃતીયખણ્ડે
૧૧૯-અધ્યાયાન્તર્ગતં પુરુષોત્તમપ્રોક્તં સર્વદેવતામન્ત્રસ્તોત્રં સમ્પૂર્ણમ્ ।

લક્ષ્મીનારાયણીયસંહિતા । ખણ્ડ ૩। અધ્યાય ૧૧૯/૬૫-૧૦૨॥

lakShmInArAyaNIyasaMhitA . khaNDa 3. adhyAya 119/65-102..

Proofread by PSA Easwaran

---

*Purushottamaproktam Sarvadevatamantra Stotram*
pdf was typeset on February 28, 2026

Please send corrections to *sanskrit@cheerful.com*